नामांक **Roll No.**

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions — 20

No. of Printed Pages — 3

# P—16–2—Sanskrit II

## प्रवेशिका परीक्षा, 2011

### संस्कृत — द्वितीय पत्रम्

### ( संस्कृत साहित्य — पद्य-काव्य, कोष व छन्द )

समय : $3\frac{1}{4}$ होरा: ( सपाद होरात्रयम् )

पूर्णांक : 40

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

(1) परीक्षार्थिभि: सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्क: अनिवार्यत: लेख्य: ।

(2) सर्वे प्रश्ना: अनिवार्या: ।

(3) प्रत्येकं प्रश्नस्योत्तरमुत्तरपुस्तिकायामेव देयम् ।

(4) प्रत्येकं प्रश्नभागस्योत्तरं क्रमानुसारमेकत्रैव लेखितव्यम् ।

(5) प्रथम प्रश्नस्य चत्वार: ( i, ii, iii एवं iv ) भागा: सन्ति । प्रत्येक भागस्य उत्तरस्य चत्वार: ( **अ, ब, स** एवं **द** ) विकल्पा: सन्ति । समुचित विकल्पस्य उत्तराक्षरं उत्तर-पुस्तिकायां निम्नलिखित तालिकां निर्माय एकस्मिन् स्थाने एव लेखनीयानि ।

| प्रश्न क्रमाङ्क: | समुचित उत्तराक्षरम् |
|---|---|
| 1. (i) | |
| 1. (ii) | |
| 1. (iii) | |
| 1. (iv) | |

1. (i) अर्बुदारावलिश्रेणय: सन्ति

(अ) पाञ्चाल देशे (ब) सिन्ध देशे

(स) राजस्थाने (द) मध्य प्रदेशे । $\frac{1}{2}$

(ii) ''विवेकानन्दविजय'' महानाटकस्य लेखकोऽस्ति

(अ) श्रीधरभास्कर वर्णेकर: (ब) विद्याधर शास्त्री

(स) अभिराज राजेन्द्र: (द) पं० गणेशराम शर्मा । $\frac{1}{2}$

(iii) जगणस्य स्वरूपम् अस्ति

(अ) ।ऽऽ (ब) ऽ।।

(स) ऽऽऽ (द) ।ऽ।. $\frac{1}{2}$

(iv) छन्द: शास्त्रस्य आद्याचार्य: अस्ति

(अ) केदारभट्ट: (ब) जयदेव:

(स) पिङ्गलाचार्य: (द) कालिदास: । $\frac{1}{2}$

2. युवावस्थापन्नाया: स्त्रिय: द्वे नामनी के ? 1

3. अर्थभेद: प्रदर्शनीय:

हर्म्यम् — प्रासाद: । 1

4. लक्ष्मी: कं नरम् उपैति ? 1

5. सभाभवनस्य चत्वारि नामानि कानि ? 1

6. भगिन्या: पुत्रस्य द्वे नामनी लिखत । 1

7. वर्णछन्द:सु कति गणा: भवन्ति ? 1

8. हरनामामृते महाकाव्ये कियन्त: सर्गा: सन्ति ? 1

9. प्रतापाय पत्रं केन प्रेषितम् ? 1

10. आचार्य दण्डिमते के अलङ्कारा: ? 1

11. ''भीष्म प्रतिज्ञा'' इत्यस्य भावार्थो लेख्य: । 2

12. क: शब्दालंकार: ? 1

13. ''मरुसौन्दर्यम्'' इति पाठस्य सारांश: स्वसंस्कृते लेख्य: । 2

14. ''लोकदेवतारामदेव:'' पाठानुसारेण पं० रामविलास शर्मा महोदयस्य परिचय देय: । 2

15. विवेकानन्देन भारत भू वैजयन्ती कथम् उच्चै: नीता ? 2

16. ''अखण्डं भारतं स्मरेत'' कविताया रचयितु: परिचयो देय: । 2

17. निम्नांकितेषु श्लोकेषु **द्वयो**: सप्रसङ्ग भावार्थो लेख्य: $2 \times (\frac{1}{2} + 1\frac{1}{2}) = 4$

(i) यानि दत्तानि तेऽस्त्राणि विश्वामित्रेण धीमता ।
तानि त्वामभिरक्षन्तु गुणै: समुदितं सदा ॥

(ii) अहिंसासत्यमस्तेयं शौचमिन्द्रियनिग्रह: ।
दानं दमो दया क्षान्ति सर्वेषां धर्मसाधनम् ॥

(iii) नित्यं स्नानान्तरं सम्यग् वस्त्रेण तनु मार्जनम् ।
कान्तिप्रदं शरीरस्य कण्डूत्वग्दोषनाशनम् ॥

18. अधोलिखितेषु अलङ्कारेषु यथेच्छं **द्वयोः** लक्षणमुदाहरणञ्च लिखत — 2 + 2 = 4

(i) रूपकालङ्कारः

(ii) प्रतिवस्तूपमा

(iii) विभावना

(iv) विशेषोक्तिः ।

19. निम्नाङ्कितेषु छन्दःसु कयोश्चित् **द्वयोः** लक्षणोदाहरणानि लेख्यानि — 2 + 2 = 4

(i) वसन्ततिलका

(ii) हरिणी

(iii) स्रग्धरा

(iv) मन्दाक्रान्ता ।

20. निम्नलिखितेषु श्लोकेषु केषाञ्चित् **त्रयाणां** प्रसङ्गान्वयपूर्वकं व्याख्या कार्या —

$3 \times (\frac{1}{2} + \frac{1}{2} + 1) = 6$

(i) अग्निमूर्जस्वलं स्वत्वरक्षाकृते
साधनैरात्मनीनैः सुसंसाधयत् ।
युद्धपोताँश्च सिन्धूरसि स्थापयद्
भूतले भातिमेऽनारतं भारतम् ॥

(ii) यत् ते भूमे विश्वनामि क्षिप्रं तदपि रोहतु ।
मा ते मर्म विमृग्वरि मा ते हृदयमर्पितम् ॥

(iii) अमलकमलपत्रोदारनेत्राभिरामः
प्रणयरसविमत्तश्चित्तचौरो मुनीनाम् ।
पतितजनविषादोन्मूलने दत्तलक्ष्यः ।
सततजितविपक्षः पश्चिमाशाविलासी ॥

(iv) यथा यथा शासन कर्मणः सा
सम्पादनेनाधिगता प्रयासम् ।
तथा तथा पुष्पवती बभूव,
तस्या महाकीर्तिलता समृद्धा ॥

(v) गृहवनपुंजे सघननिकुंजे,
ननु परितः प्रसरन्तम् ।
भुवि विहरन्तं मधु रसयन्तं,
कलयत सुखदवसन्तम् ॥